श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

माडभूषी वेङ्कटराघवाचार्यस्य कृतिषु

# ॥ श्री मालोलपञ्चरत्नम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री मालोलपञ्चरत्नम् ॥

कदा पुण्ये हृद्ये खगपतिगिरौ भार्गवतटे
श्रिया चञ्चूदेव्या श्रममुषि चरन्तं नरहरिम्।
अये ! लक्ष्मीकान्तांबुजनयन ! कायाधवनुत !
प्रसीदेति क्रोशन्निमिषमिव नेष्यामि दिवसान्॥ 1 ॥

कदा वा संसुप्तं महति कमनीयाद्रिकुहरे
सदा श्रीभूमिभ्यां मृदितपदपद्मं नरहरिम्।
सुराधीशैस्सर्वैः विनुतपदपद्म ! त्रिनयन !
प्रसीदेति क्रोशन्निमिषमिव नेष्यामि दिवसान्॥ 2 ॥

कदा वा द्रक्ष्येऽहं श्रितजनसखं मङ्गलगुणं
श्रियः कान्तं श्रीवण्शठरिपुयतीशार्चितपदम्।
हरे ! विष्णो ! कृष्णाच्युत ! मुरहर ! क्रोडनृहरे !
प्रसीदेति क्रोशन्निमिषमिव नेष्यामि दिवसान्॥ 3 ॥

कदा वा कान्तारे नृहरिपदपद्माङ्किततटे
स्मरन् लक्ष्मीकान्तं कमलनयनं चन्द्रधवलम्।
अये ! षष्ठश्रीवण्शठरिपुयतीन्द्रप्रिय ! हरे !
प्रसीदेति क्रोशन्निमिषमिव नेष्यामि दिवसान्॥ 4 ॥

स्तम्भे दर्शय विष्णुमव्ययमिति प्रोक्तेन पित्रा क्षणात्
स्तम्भे प्रादुरभूत् कयाधुतनयेनाभ्यर्चितो यो हरिः।
तं लक्ष्मीनरसिंहरूपिणमहं तार्क्ष्याद्रितारािधपं
स्वाङ्कारूढहरिप्रियाभुजसमाश्लिष्टं मुरारिं भजे॥ 5 ॥

मालोलपञ्चरत्नं माधवमङ्गलगुणांबुधेर्नीतम्।
जीयादिदं ज्ञभुक्तं वेङ्कटराघवविपश्चिता नित्यम्॥ 6॥

॥ श्री मालोलपञ्चरत्नं समाप्तम्॥